# A-I/1/22AMIS1CCTC1/23

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. राजसूयस्य विधायकं वाक्यं किम्?
2. तन्त्रलक्षणं किम्?
3. को नाम प्रसङ्गः?
4. पूर्वमीमांसायां द्वादशाध्यायेषु कति पादाः सन्ति?
5. पञ्चप्रयाजाः के?
6. कपिञ्जलाधिकरणन्यायः कः?
7. विद्वद्वाक्यम् इति नाम्ना प्रसिद्धं वाक्यं किम्?
8. निर्वापे प्रत्यभ्यासं मन्त्रावृत्तिः अस्ति न वा?
9. चातुर्मास्येषु कति पर्वाणि सन्ति? कानि तानि?
10. उत्तरागोदोहनन्यायस्य विषयवाक्यं किम्?
11. सत्रलक्षणं किम्?
12. अहीनस्य लक्षणं किम्?
13. सत्रे आर्त्विज्यं कस्य?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. सोदाहरणं तन्त्रलक्षणं व्याख्यात।
15. उत्तरागोदोहनन्यायम् उपवर्णयत।

16. प्रयाजादीनां सकृदनुष्ठानाधिकरणम् आरचयत।

17. ब्राह्मणस्यैव आर्त्विज्याधिकरणम् उपपादयत।

18. भूयोनुग्रहन्यायं विवृणुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

19. तन्त्रप्रसङ्गयोः भेदमुपपादयत।

20. पशुपुरोडाशाधिकरणं व्याख्यात।

21. प्रसङ्गं सोदाहरणम् उपपादयत।

# A-I/2/22AMIS1CCTC2/23

**प्रथमसत्रार्द्धम्**

**द्वितीयपत्रम्**

**मीमांसा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

## खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. "मीमांसाख्या विद्या बहुविद्यान्तराश्रिता" कथम्?
2. सम्बन्धस्य उभौ आश्रयौ कौ?
3. लोक इत्यादिभाष्यस्य षडर्थाः के?
4. प्रथमसूत्रे "अथ" शब्दार्थः कः?
5. समावर्तनविधिविरोधपरिहारः कथम्?
6. सर्वार्था सूत्रव्याख्या का?
7. अन्यस्य कर्मणः अनन्तरं धर्मजिज्ञासा न युज्यते कुतः?
8. धर्मे प्रमाणं किम्?
9. का नाम चोदना?
10. चोदनासूत्रार्थः कः?
11. कः मिथ्याप्रत्ययः?
12. चोदनायाः वैशिष्ट्यं प्रदर्शयत।
13. श्येनादयः न धर्माः नाप्यधर्माः कथम्?

## खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. मीमांसायाः प्रयोजनं प्रतिपादयत।
15. अथशब्दस्य दूषणपक्षं विवृणुत।

16. धर्मे चोदनायाः प्रामाण्यं निरूपयत।

17. चोदनासूत्रार्थमुपस्थापयत।

18. “तस्य निमित्तपरीष्टिः” इति सूत्रार्थः व्याख्यायताम्।

19. प्रत्यक्षस्य धर्मे अप्रामाण्यं स्थापयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. प्रामाण्यवादस्य विषये प्रबन्धं लिखत।

21. प्रमाणफलभावविचारः निरूप्यताम्।

22. प्रत्यक्षप्रमाणनिरूपणं क्रियताम्।

# A-I/3/22AMIS1CCTC3/23

**प्रथमसत्रार्द्धम्**

**तृतीयपत्रम्**

**मीमांसा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. अर्थवादाधिकरणस्य प्रथमपूर्वपक्षसूत्रं लिखत।
2. अर्थवाद-वाक्यशेषयोः भेदं प्रदर्शयत।
3. का नाम एकवाक्यता?
4. "तुल्यं च साम्प्रदायिकम्" सूत्रार्थो वर्ण्यताम्।
5. औदुम्बराधिकरणविषयः प्रदर्श्यताम्।
6. 'तेन हि अन्नं क्रियते' अत्र लकारः कः?
7. शास्त्रदृष्टविरोधम् उदाहरत।
8. कः गर्गत्रिरात्रः?
9. अन्यानर्थक्यसूत्रे कं विषयमाश्रित्य विचारः प्रस्तुतः?
10. रात्रिसत्रन्यायस्य आकारं वर्णयत।
11. प्रकरणे पठितस्य पूषा प्रपिष्टभागः इत्यस्य को विशेषः?
12. आतिथ्येष्टिः कस्मिन् प्रकरणे श्रूयते?
13. "विवक्षितवचनाः मन्त्राः" कथम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. विधिनात्वेकवाक्यत्वादिति सिद्धान्तसूत्रार्थं वर्णयत।
15. नष्टाश्वदग्धरथन्यायः व्याख्यायताम्।

16. औदुम्बराधिकरणसारः सङ्गृह्यताम्।

17. "तेन हि अन्नं क्रियते" इत्यत्र विद्यमानविचारः उपस्थाप्यताम्।

18. "गुणार्थाः वा पुनः श्रुतिः" इति सूत्रार्थं परिशीलयत।

19. सप्रसङ्गं नियमविधिं व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. अर्थवादानां भावनान्वयप्रकारं निरूपयत।

21. हेतुवन्निगदाधिकरणमारचयत।

22. मन्त्राणाम् अविवक्षितार्थत्वपक्षं निराकृत्य स्वपक्षं स्थापयत।

# A-I/4/22AMIS1CCTC4/23

**प्रथमसत्रार्द्धम्**

**चतुर्थपत्रम्**

**मीमांसा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. सप्तपाकयज्ञसंस्थाः काः?
2. पशुप्रभवं कतिविधम्?
3. कति सोमसंस्थाः?
4. दर्शशब्दार्थः कः?
5. पूर्णमासशब्दार्थः कः?
6. आहवनीयशब्दार्थः कः?
7. उपसमिन्धनं नाम किम्?
8. कोऽयं पिण्डपितृयज्ञः?
9. कः सङ्कल्पः?
10. कः अध्वर्युः?
11. समीक्षणं नाम किम्?
12. प्रादेशपरिमाणं किम्?
13. कति परिधयः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. "अथातो दर्शपूर्णमासौ व्याख्यास्यामः" इति सूत्रं व्याख्यात।
15. "प्रातरग्निहोत्रं हुत्वा........." इति सूत्रविचारान् प्रस्तुव?

16. "अमावास्यायां यदहश्चन्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञं कुर्वते अपराह्णे", "अधिवृक्षसूर्ये वा पिण्डपितृयज्ञेन चरन्ति" इति सूत्रद्वयं व्याख्यात।

17. "अङ्गुलिप्रक्षालनं पात्री निर्णेजनं चोल्मुकेनाभितप्य स्फ्येनान्तर्वेदि तिस्रो लेखा लिखति प्राचीरुदीचीर्वा" "आग्नीध्रो हवींषि सुश्रुतानि करोति" – सूत्रद्वयं व्याख्यात।

18. "प्रक्षालितायां पात्र्यां निष्टप्तोपवातायां पवित्रवत्यां पिष्टानि संवपति यथादेवतं त्रिर्यजुषा तूष्णीं चतुर्थम्" इति सूत्रं व्याख्यात।

19. "देवस्य सवितुः सुवे इति खनति द्व्यङ्गुलां त्र्यङ्गुलां चतुरङ्गुलां यावत्पाष्र्ण्याः शुक्लं तावतीं पृथमात्रीं रथवर्त्ममात्रीं सीतामात्रीं प्रादेशमात्रीं वा पुरीषवतीम्"॥ इति सूत्रं व्याख्यात।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. दर्शपूर्णमासौ इति विषये टिप्पणीं लिखत।

21. कल्पसूत्राणां विषये प्रबन्धं लिखत।

22. पिण्डपितृयज्ञस्य विषये विवरणं कुरुत।